# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा - अक्टूबर - 2019

| | | |
|---|---|---|
| **कक्षा-आचार्य(SEM-3) (New)** | **प्रश्नपत्रम् – 3** | गुणाः –70 |
| विषयः – साहित्यम् | **कोड –C.C.5.3.8** | समयः- 3 तः 6 पर्यन्तम् |
| दिनाङ्कः –11/10/2019 | सन्दर्भग्रन्थः – रसगङ्गाधरः | |

**प्रथमान्वितिः (Unit 1)** गुणाः

**प्रश्न १ अधोलिखितयोः एकस्य ससन्दर्भं व्याख्यां कुरुत।** ५

१ स्मृताऽपि तरुणातपं करुणया हरन्ती नृणामभङ्गुरतनुत्विषां वलयिता शतैर्विद्युताम्।
कलिन्दगिरिनन्दिनीतटसुरद्रुमालम्बिनी मदीयमतिचुम्बिनी भवतु काऽपि कादम्बिनी॥

२ निर्मायिनूतनमुदाहरणानुरूपं काव्यं मयाऽत्र निहितं न परस्य किञ्चित्।
किं सेव्यते सुमनसां मनसाऽपि गन्धः कस्तूरिकाजननशक्तिभृता मृगेण॥

**प्रश्न २ निम्नलिखितयोः कस्याप्येकस्य प्रश्नस्योत्तरं विवर्णयत।** १०

१ पण्डितराजजगन्नाथस्य परिचयं विस्तरेण लिखत।

२ रसगङ्गाधरस्य वैशिष्ट्यं महत्त्वं च प्रतिपादयत।

**द्वितीयान्वितिः (Unit 2)**

**प्रश्न ३ निम्नलिखितयोः एकं ससन्दर्भं व्याख्यायत।** ५

१ तत्र कीर्ति-परमाह्लाद-गुरुराजदेवताप्रसादाद्यनेक-प्रयोजनकस्य काव्यस्य लक्षणं तावन्निरूप्यते।

२ लोकोत्तरत्वं चाह्लादगतश्चमत्कारत्वापरपर्यायः अनुभवसाक्षिको जातिविशेषः।

**प्रश्न ४ निम्नलिखितयोः कस्याप्येकस्य प्रश्नस्योत्तरं विवर्णयत।** १०

१ रसगङ्गाधरानुसारं काव्यलक्षणं निरूपयत।

२ उत्तमोत्तमकाव्यं सलक्षणं सोदाहरणं प्रतिपादयत।

## तृतीयान्वितिः (Unit 3)

**प्रश्न ५ निम्नलिखितयोः एकं ससन्दर्भं व्याख्यायत।** ५

१ तथा चाहुः 'व्यक्तः स तैर्विभावाद्यैः स्थायी भावो रसः स्मृतः' इति।
व्यक्तो व्यक्तिविषयीकृतः। व्यक्तिश्च भग्नावरणा चित्।

२ 'मुख्यतया दुष्यन्तादिगत एव रसो रत्यादिः
कमनीयविभावाद्यभिनयप्रदर्शनकोविदे दुष्यन्ताद्यनुकर्तरि नटे
समारोप्य साक्षात्क्रियते" इत्येके।

**प्रश्न ६ निम्नलिखितयोः कस्याप्येकस्य प्रश्नस्योत्तरं विवर्णयत।** १०

१ पण्डितराजजगन्नाथाभिमतं रसस्वरूपं लिखित्वा व्याख्यायत।

२ रसविषयकमतानि लिखत।

## चतुर्थान्वितिः (Unit 4)

**प्रश्न ७ निम्नलिखितयोः एकं ससन्दर्भं व्याख्यायत।** ५

१ रतिः शोकश्च निर्वेद-क्रोधोत्साहाश्च विस्मयः।
हासो भयं जुगुप्सा च स्थायिभावाः क्रमादमी॥

२ स्त्रीपुंसयोरन्योन्यालम्बनः प्रेमाख्यश्चित्तवृत्तिविशेषो रतिः
स्थायिभावः। गुरु-देवता-पुत्राद्यालम्बनस्तु व्यभिचारी।

**प्रश्न ८ निम्नलिखितयोः कस्याप्येकस्य प्रश्नस्योत्तरं विवर्णयत।** १०

१ स्थायिभावान् सलक्षणं लिखत।

२ शृङ्गाररसं सोदाहरणं सप्रकारं लिखत।

**प्रश्न ९ दशप्रश्नानामतिलघूत्तराणि लिखत।** १०

१ पण्डितराजजगन्नाथस्य पितुर्नाम किम्?

२ रसगङ्गाधरस्य काव्यलक्षणं किम्?

३ कतिविधं काव्यं जगन्नाथमते?

४ ‘शयिता सविधे’ इति कस्य काव्यस्योदाहरणम्?

५ अधमकाव्यस्य लक्षणं किम्?

६ रसविषयकमतानि कति सन्ति?

७ को नाम शोकः?

८ विस्मयस्य लक्षणं किम्?

९ व्यभिचारिभावलक्षणं किम्?

१० “वाचो माङ्गलिकीः” इति कस्य शृङ्गारस्य उदाहरणम्?

११ “मलयानिलकालकूटयोः” इति कस्य रसस्योदाहरणम्?

१२ वीररसः कतिविधः?

१३ “सपदि विलमेतु” इति कस्य रसस्य उदाहरणम्?

१४ विभावः कतिविधः? के च ते भेदाः?

१५ मङ्गलाचरणे कस्य स्तुतिः अस्ति?